हीरोचरितम्

आचार्य डॉ० वनेश्वरपाठकः

ज्योत्ति
पटना, राँची, वाराणसी

॥ श्रीः ॥

हीरोचरितम्

प्रणेता

आचार्य डा० वनेश्वरपाठकः एम. ए., डी. लिट.

(उत्तरप्रदेशशासनद्वारा साहित्यिक पुरस्कारेण सम्मानितः)

संस्कृतविभागाध्यक्षः

सेंट जेवियर्स कालेज, राँची (विहारः)

प्रकाशकः

ज्योति, कन्नूलालपथ

मीठापुर, पटना

प्रथमं संस्करणम् १९८२ खीस्तवर्षम्, फरवरी मासः ।

(सर्वेऽधिकारा : लेखकाधीनाः)

मूल्यम्—रूप्यकत्रयम्

मुद्रकः—जयन्ती प्रेस एण्ड प्रकाशन भदैनी वी० २/२६२ एच०
वाराणसी

प्रास्ताविकम्

'हीरोचरितम्' नामेदमभिनवं काव्यं मे कवेर्मनसोऽभिनवा प्रसूतिः। अभिनवमपि काव्यमिदं सर्वथा मौलिकमित्यपि निगदितुं न शक्यते। इतः पूर्वं वगौरा (सिवान) ग्रामवासिना श्री सूर्यदेवपाठकेन भोजपुरीभाषायां विरचितं 'हीरोचरितमानसम्' नाम लघुकाव्यं (कविना तेन मह्यमुपहृतम्) मया सुरुचिपूर्वकमधीतम्। वस्तुतस्तदेव काव्यमस्य हीरोचरितस्य प्रेरणा स्रोतः समजनीत्यहं सत्येन मनसा स्वीकरोमि। संस्कृते त्विदमभिनवमेव।

हीरोचरितमिदं सर्वेषां प्रीतिकरं भविष्यतीत्यहं न विश्वसिमि। किन्तु किमपि काव्यं कदापि कस्यापि कृते प्रीतिकृद् भवतीति भवभूतेर्विश्वासो मे विश्वासं द्रढयति। सत्यमेवोक्तं तेन क्रान्तिकारिमतिना विश्वविभूतिभवभूतिना—

"ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यते हि मम कोपि समानधर्मा
कालोह्ययं निरवधिर्विपुला च पृथ्वी॥"

(उत्तररामचरितम्)

अस्तु, 'हीरोचरितम्' निर्माय प्रकाश्य च भवतां समक्षं प्रस्तूयते; प्रत्ययेनानेन यत् 'लटकमेलक' वदिदमपि संस्कृतसमाजस्योपयोगाय सम्पत्स्यत इति। हीरोचरितमिदं हिप्पीचरितमपि भङ्ग्ययन्तरेण कथयितुं शक्यते। यतो हि हीरो-हिप्पीनरयोः विशेषाधायकं किमपि वैशिष्ट्यं स्थूलतां नेति। अतः षष्टिपद्यात्मकमिदं हीरोचरितं हिप्पीषष्टीति नाम्नापि संज्ञातुं शक्यते। यथा सदोषेऽपि हीरोचरिते दोषदृष्टिः सङ्कटाद् बहिर्भूता न तथैवेदमपि हीरोचरितं दोषदृष्ट्या न द्रक्ष्यन्ति द्रष्टारः, दृष्टानपि दोषान् क्षमापथं प्रापयिष्यन्ति पण्डिताः, तथाचात्रापि कमप्यभिनवमनास्वादितंरसमास्वादयिष्यन्ति सदयाः सहृदयाः इति प्रतीतिमादधानः समापयामि प्रास्ताविकमिदम्।

२०३८ वैक्रमाब्दीया
महाशिवरात्रिः।
राँची

विदुषामश्वः
वनेश्वर पाठकः

अथातो हीरोजिज्ञासा
हीरोरूपम्
हीरोर्भेदाः
हीरोर्विद्यार्थी
हीरोः शिक्षकः
कार्यालये हीरोः
हीरोर्नेता
हीरोः कविः
सर्वं हीरोमयं जगत्
हीरोमहत्त्वम्

।। श्रीः ।।

हीरोचरितम्

अथेदमारभ्यते हीरोचरितं नामाभिनवं काव्यम्, यस्यायमादिमः श्लोकः —

(१)

सकलजनविनिन्द्यः सर्वदोषैरहीनः,
निजजनकजनन्योर्दुःखदो बुद्धिहीनः ।
अखिलभुवनभर्तुः कापि सृष्टिर्नवीना,
जयति जयति हीरोदेंशदुर्भाग्यजन्मा ।।

(२)

सर्वदूषणसम्पन्नो विपन्नो विद्यया धिया ।
वन्दनीयः सदासद्भि[1]र्हीरोरूपधरो नरः ।।

अथातो हीरोजिज्ञासा—(हीरोवर्णिता आत्मकथा)

(३)

मातापित्रोरमितसुकृतस्योदयान्मेऽवतारः,
कीर्तिर्दूरं मम सुजनुषा मत्कुलस्य प्रयाता ।
धन्या माता मम च जनकः पूर्वजा मे च धन्याः,
गर्वं को नानुभवति जनो मादृशेनात्मजेन ।!

(४)

हीरो र्यस्मिन् भवति सुकुले तत्कुलस्य प्रशस्तिं
कर्तुं नैव प्रभवति गुरुः[2] शारदा वा फणीशः ।
पित्रोः कीर्तिं निजसुचरितैर्वर्द्धयन् मेधयाऽसौ
हीरोनाम्ना विदितमहिमा राजतेसत्समाजे[3] ।।

---

१. सदासद्भिः—सदा+असद्भिः । २. गुरुः—देवगुरुः बृहस्पतिः ।
३. राजते सत्समाजे—राजते+असत्समाजे ।

(५)

नो लज्जेऽहं क्वचिदपि कथञ्चित् प्रवक्तुं च किञ्चित्,
नो लज्जेऽहं क्वचिदपि च केनापि किञ्चिद् विधातुम् ।
नो लज्जेऽहं कमपि किमपि प्रार्थयन् स्वानुकूलं
नो लज्जेऽहं प्रबलपुरुषैस्ताडितस्तर्जितोऽपि ॥

(६)

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
शुनि चैव श्वपाके च हीरोर्गीतासुपण्डितः ॥

(७)

नाऽहं लोकेऽनुचररहितः सम्प्रदायेन हीनः,
नाऽहं कश्चित् प्रविरलजनो जन्तुरेवास्म्यपूर्वः ।
मित्राण्यस्मिन् जगति विलते सन्ति मेऽसंख्यकानि
सृष्टेः कालात् प्रथितमहिमा सम्प्रदायो महान् मे ॥

(८)

भक्ष्याभक्ष्ये विगतरुचिको वस्त्रवान् वस्त्रहीनः,
स्थानेऽस्थाने विहितवसतिर्वेशभूषाविचित्रः,
न स्त्रीवाऽसौ न हि च पुरुषो योऽर्द्धनारीनरश्च,
सोऽस्माकं सत्सुकृतसरणीप्रेरणास्रोत ईशः ॥

(९)

शिक्षाऽस्माकं श्रुतिषु न हि या न स्मृतिग्रन्थराशौ,
दाता तस्या जगति विदितोऽसौ महात्मा कबीरः ।
आचक्षेऽहं शृणुत सुभगां तां कबीरस्य वाणीं
यामाश्रित्य प्रचुरसुखदां पण्डितः सर्वलोकः ॥

(१०)

पाठं पाठं परमगहनान् ग्रन्थराशीन् न कोऽपि
हीरोर्जातः परमचतुरो भूतलेऽस्मिन् विधातुः ।
प्रेम्णः सार्द्धद्वयपरिमितं शब्दमेवाधिगत्य
सर्वो हीरोर्भवति चतुरो वंशकीर्तिप्रचारी[१] ॥
"पोथी पढ़ि पढ़ि जग मुआ, हीरो भया न कोय ।
ढाई अक्षर प्रेम का, पढ़े सो हीरो होय ॥"

इति कबीरवचनामृतात्

---

१. वंशकीर्तिप्र चारी—वंशकीर्तिप्रणाशी । चर गतिभक्षणयोः ।

(११)

हीरोर्यस्मिन् कुले जन्म गृह्णीते दैवयोगतः।
कुलं तत् कीर्तिमाप्नोति स्वर्लोके च महीयते[1] ॥

(१२)

हीरोद्दृष्टावनुचितमिदं नोचितं वास्ति किञ्चित्,
हीरोनैवानुचितमुचितं वेत्ति किञ्चिज्जगत्याम्।
सर्वं कर्तुं प्रभवति मनस्तस्य यद् वाञ्छतीह,
हीरोः स्त्रीयं मन इह जगत्यां प्रमाणं बिभर्ति ॥

(१३)

हीरोनैवाश्रयति नियतं केवलं वस्तु पथ्यं,
नैवात्यन्तं त्यजति किमपि स्वास्थ्यहानिप्रदंवा।
पथ्यापथ्ये विगतममतः स्वेच्छया वर्त्तयंश्च
यद् वा तद्वा भवतु न हि तच्चिन्तयत्येष हीरोः ॥

(१४)

(हीरोरूपम्)–

हीरोजातः परमपुरुषस्यांशतः शंकरस्य[2]
तस्मात् तस्य द्विविधमिह रूपं मनोहारि चित्रम्।
एकं केशैर्विविधरचनैः साधितं श्मश्रुहीनं
नारीरूपम्. परमकुटिलश्मश्रुयुक्तं द्वितीयम् ॥

(१५)

वेशेनासौ न हि परिचितो बालको बालिका वा,
पुंसां भ्रान्तिं जनयतितरां स्त्रैणरूपः स हीरोः
माता खिन्ना पितुरपि मनः खिन्नमास्ते यतो हि
जातो वंशं ब्रुडयितुमयं नौ सुपुत्रः कमालः[3] ॥

---

१. महीयते—मही इवाचरति, उच्चतां नाप्नोति, न तु पूज्यते।

२. अत्र भ्रमवशात् कश्चित् 'संकरस्य' इति न पठेत्

३. कमालः–कमा = सौन्दर्यम्; लक्षणया, अर्शआदित्वादचि वा सुन्दरी, ताम् आलाति = समन्ताद् बध्नाति गृह्णाति वा कमालः = सौन्दर्यस्य सुन्दर्या वा उपासकः, लम्पट इत्यर्थः।

(१६)

(हीरोभेदाः)—

कश्चनास्ते लघुर्हीरोर्हीरोःकश्चिन्महांस्तथा ।
हीरोजंगत्यां द्विविधः सामान्येन प्रकीर्तितः ॥

(१७)

तारतम्याद् विवेकादेर्हीरोरत्र त्रिधा स्मृतः ।
हीरोशास्त्रे च ते भेदा उत्तममध्यमाधमाः ॥

(१८)

किञ्चिद्बुद्धिविवेकादिहीनो हीरोः स्मृतोऽधमः ।
बुद्धिविद्यादिहीनोऽपि लज्जावान् मध्यमो मतः ॥

(१९)

हीनो बुद्धिविवेकाभ्यां विद्यया विनयेन च ।
सर्वदोषैरहीनश्च स हीरोरुत्तमः स्मृतः ॥

(हीरोर्विद्यार्थिरूपम्)—

(२०)

विद्यार्थिनो राष्ट्रविकासकार्ये विद्यार्जने च प्रथितानुरागाः ।
विद्यालये वा क्वचिदालये वा वयं स्वकीयां मतिमाश्रयामः ॥

(२१)

कक्षासु नैवाध्ययने कदाचिन्मनोऽस्मदीयं रमते कथञ्चित् ।
अध्यापकानां परिहाय नेत्रे परत्र नेत्रे परिचालयामः ॥

(२२)

निर्माय सद्यः खलु छात्रमण्डलं बाधां विदध्मोऽध्ययनादिकर्मसु ।
क्वचित् परीक्षाभवनेष्ववैधतां समाश्रयामो नितरां विगर्हिताम् ॥

(२३)

कदाचिदस्मद्विहिताधरोधने यदि प्रयत्नं विदधाति कश्चन ।
समूलमुन्मूलयितुं तमेव हि वयं भवामः कटिबद्धतत्पराः ॥

(२४)

मिष्टान्नगेहं चलचित्रसद्म च विद्यालयञ्चाथ परीक्षणालयम् ।
यानादिकञ्च प्रतिकूलतां गतं सर्वं क्षणेनैव विनाशयामः ॥

(२५)

न भारतीया किल लोकरीतिर्नीतिर्न वा काचिदिहास्मदीया।
गतिं नवीनां सुगमामुपास्य मतिं निजेच्छासरणे दधामः॥

(२६)

मनोहरेण पाश्चात्त्यचाकचिक्येन भाविताः॥
वयं भारतदेशस्य कर्णधारा प्रशंसिताः।

(२७)

वयमेवास्य देशस्य हृत्खण्डानि प्रकीर्तिताः।
देशस्यास्य भविष्यत्त्वमस्मास्वेवास्ति निर्भरम्॥

(२८)

(हीरोः शिक्षकः)—

एम. ए. जातः कथमपि गुरोः सेवया चात्मवृत्या[1]
लब्ध्वोपाधिं विविधविधिना गर्हितेनापि सद्भिः।
शिक्षास्थानेष्वधिकगुरुतासूचकं स्थानमेत्य
हीरोनैवाभिरतमनसाऽध्यापनेऽस्ति प्रवृत्तः॥

(२९)

कक्षां स्वीयां प्रतिदिनमसौ याति नित्यं बिलम्बात्,
गत्वा चापि प्रमुदितमना नैव कार्यं करोति।
वारं वारं स्वकरघटिकायन्त्रमालोकयन् स
कालं सर्वं नयति नियतं व्यर्थमाभाषमाणः॥

(३०)

नयति सकलकालं व्यर्थमाभाषमाणः,
पिबति मधुरपेयं स्वत्ति ताम्बूलपत्रम्।
अनुभवति तमालं सेवते वा पनामां[2]
विगलतु शुभशिक्षा चिन्तितो नात्र हीरोः॥

---

१. आत्मवृत्त्या हीरोवृत्त्या।

२. वा पनामाम्—वा + अपनामाम् = वापनामाम्। अपकृष्टं (कुत्सितं) नाम ख्यातिर्यस्यास्ताम् अपनामाम्। हीरोशब्दे पृषोदरादित्वात् साधु।

(३१)

(कार्यालये हीरोः) —

कार्यालये नैव बिभीम ईश्वरात् कर्तव्यहानेरपि नो बिभीमः ।
कालं नयामोऽधिकचायपानैः गोष्ठीविधानेन च यत्र तत्र ॥

(३२)

चित्तेऽस्मदीये खलु भीतिरस्ति चेत् स्वस्माद् वरिष्ठात्तु पदाधिकारिणः ।
आलम्ब्य नीतिं प्रियचाटुकारितां[३] तमेव नित्यं समुपास्महे वयम् ॥

(३३)

इच्छां तदीयामभिलक्ष्य तस्य सदानुकूलं वचनं वदामः ।
तं संस्तुवन्तो मधुरैर्वचोभिः कुर्मोऽर्थसिद्धिं सकलामभीष्टाम् ॥

(३४)

उपेक्ष्य सर्वं जनताहितञ्च स्वेच्छानुसारं खलु वर्त्तयामः ।
कदापि कार्यं स्थगितं प्रकुर्मः सम्पादयामोऽथ शनैः शनैर्वा ॥

(३५)

सदैव याच्ञामधिकारिपार्श्वं विभिन्नरूपां बहुकल्पिताञ्च ।
प्रस्तूय चाक्रोशमिह प्रदर्श्य चिराय सत्याग्रहमाश्रयामः ॥

(३६)

भवेदनेनोद्यमवृद्धिरोधः, उत्पादनं वा शिथिलत्वमीयात् ।
न वा भवेद् वैद्युतसम्प्रकाशः, आपूर्त्तिबाधा च भवेज्जलस्य ॥

---

३. अत्र जिज्ञासूनां सुखबोधाय प्रसंगतो देव्याश्चाटुकारितायाः केचन महामन्त्रा उद्धियन्ते—

त्वन्मायामोहिताः सर्वे देवदानवमानवाः ।
महामाये ! महामोहे ! नमस्ते चाटुकारिते ॥ १ ॥

त्वत्कृपालेशतो देवि ! प्राप्यते सुमहत् फलम् ।
जनः क्षुद्रोऽपि महतां पदं प्राप्नोत्यसंशयम् ॥ २ ॥

देवि ! ते प्रियसेवकाश्चमचेति विश्रुतनामकाः ।
त्वत्प्रसादाद् भूतलेऽपि स्वर्ग्यसौख्यसमन्विताः ॥ ३ ॥

इत्यादि ! (चाटुकारितास्तोत्रम्)

(३७)

विद्यार्थिनामध्ययनस्य हानिर्बाधा भवेच्चापि परीक्षणस्य ।
चिकित्सितं स्यान्न रुजातुराणां वयं तु सत्याग्रहमाश्रयामः ॥

(३८)

महात्मगान्धिचरिते मार्गे सत्याग्रहे स्थिताः ।
वयं भारतराष्ट्रस्य योग्या हीरोनरा ननु ॥

(हीरोनेंता)—

(३९)

हीरोनेंता परमचतुरो भाषणेऽतिप्रवीणः
स्वार्थेनान्धः सकलजनतावञ्चकोऽसत्यवादैः ।
चाटूकृत्य प्रवरपुरुषान् नम्रवाग्भिः प्रतार्य
सर्वानर्थान्[१] कुटिलमतिकः साधयत्येष धूर्तः ॥

(४०)

अपशब्दापमानादीन् सोढ्वा दक्षिणनायकः ।
हीरोः सर्वार्थकुशलस्तर्जितोऽपि न लज्जितः ॥

(४१)

'स्वार्थं समुद्धरेत् प्राज्ञः स्वार्थभ्रंशो हि मूर्खता' ।
एतां नीतिं समाश्रित्य वयं हीरोः प्रतिष्ठिताः ॥

(४२)

न जातु काचित् स्थिरताऽस्मदीया
न नोऽस्ति कश्चित् सुदृढो विचारः ।
न गेहचिन्ता न हि देहचिन्ता
न चास्ति चिन्ता जनताहितस्य ॥

(४३)

एकैव चिन्ता खलु मानसे नः
सत्तां समासाद्य सुखं वसामः ।
तदर्थमेवाखिलमभ्युपायं
समाश्रयामोऽनुचितोचितं च ॥

---

१. सर्वानर्थान्—सर्व + अनर्थान् ।

(४४)

विहाय लज्जां परिवर्तयामहे
दलं स्वकीयं समुपास्महेऽपरम् ।
जनेषु वादांश्च विभिन्नरूपकान्
विधाय सत्तामधिकुर्महे वयम् ॥

(४५)

कदाचिदस्माकमभीष्टसिद्धौ
बाधां विधत्तेऽन्यदलीयनेता ।
जनान् समुत्साह्य च तद्विरुद्धं ।
क्रान्तिं नवीनां परिचालयामः ॥

(४६)

एवमेव वयं सर्वे हीरो राष्ट्रस्य चिन्तकाः ।
परस्परं विनिन्दन्तो मतं प्राप्तुं यतामहे ॥

(४७)

वयं राष्ट्रस्य नेतारः स्वार्थसाधनतत्पराः ।
राष्ट्रस्यास्य समुत्थानं हीरोष्वेवास्ति निर्भरम् ॥

(४८)

(हीरोः कविः)—(हीरोस्तु चुम्बकः[1] कविः)

भावं भाषामपि च सरणीं वस्तुजातं च रम्यं
सर्वं हीरोहरति हरणेऽतिप्रवीणः परस्य ।
वाक्यैः स्वीयैः परमसरसैर्दर्शयद्भिर्नवत्वं
निर्मायासौ कथमपि कवित्वं कविं मन्यते स्वम् ॥

(४९)

हीरोमंन्ये परमचतुरः सत्कवीनां पुरःस्थो
लज्जाहीनो विगलितभयो रूपमाधाय चित्रम् ।
भावैर्भव्यैरभिनययुतैः सर्वचेतो ग्रहीतुं
फिल्मीगीतानुकृतिपरको गायनि स्वं स काव्यम् ॥

---

१. "यश्चुम्बति परस्थार्थान् वाक्येन स्वेन हारिणा ।
स्तोकार्पितनवच्छायं चुम्बकः स कविर्मतः ॥"
(राजशेखरः,काव्यमीमांसा, अध्यायः १२)

(५०)

मध्ये मध्ये पिबति सलिलं शुष्ककण्ठः सलीलं
ताम्बूलञ्चेद् भवति सुलभं तेन गल्लं बिभर्ति ।
जानीते नो समयनियमं लज्जते नोपहासैः,
धृष्टोऽल्पज्ञः कविवरयशः प्राप्तुमुत्कः स हीरोः ॥

(५१)

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
हीरोकवेस्तु न हि तान् प्रति कापि चिन्ता ।
उत्पत्स्यते हि मम कोऽपि समानधर्मा
हीरोरिदं स्वमनसाऽभिविमृश्य तुष्टः ॥

(५२)

(सर्वं हीरोमयं जगत्) —

छात्रो हीरोर्गुरुर्हीरोर्हीरोर्नेताऽथ सेवकः ।
स्वामी हीरोः कविर्हीरोः सर्वं हीरोमयं जगत् ॥

(५३)

हीरोर्देशे विदेशे च हीरोर्ग्रामे तथा पुरे ।
नेदृश किञ्चन स्थानं यत्र हीरोर्नदृश्यते ॥

(५४)

वीथ्यां वीथ्यां नगरे नगरे ग्रामे ग्रामे भवने भवने ।
वदने वदने हृदये हृदये, हीरोस्तिष्ठति सर्वजनेषु ॥

(५५)

विश्वस्मिन्नहि किमपि स्थानं, यन्न हि हीरोचरितैर्व्याप्तम् ।
बहिरन्तश्च हि सर्वत्रैव, हीरोगाथाश्रुतिपथमेति ॥

(५६)

हीरोहृदये भीतिर्नास्ति नीतिर्नास्ति नास्ति च रीतिः ।
यस्यास्ते हृद ह्रिया विहीनं हीरोः सत्यः स एव पक्वः ॥

(५७)

(हीरोमहत्वम्)—

हीरोकृत्यं परमगहनं सर्वलोकातिगं यत्
सर्वांशं तन्निगदितुमलं नैव कोऽप्यत्र लोके ।
नव्यं नव्यं प्रतिदिनमिमे कुर्वते कर्मजातं[1]
यद् दृष्टं वा श्रुतिपथमितं जायते क्लेशकारि ॥

(५८)

हीरोरेव विजानाति हीरोचरितमद्भुतम् ।
अतस्तद्वर्णनेऽलत्वं हीरोभिः क्षम्यतां मुदा ॥

(५९)

हीरोहिप्पीरुभावेव विधातुनूतना कृतिः[2] ।
उभौ समानधर्माणौ भिन्नौ तौ नाममेदतः ॥

(६०)

काव्यमेतन्मयाऽपूर्वमुभयोः प्रीतये कृतम् ।
उभयार्थमिदं तस्मान्नाममेदेन योज्यताम् ॥

॥ इति ॥

॥ समाप्तमिदं डॉ० वनेश्वरपाठककृतं हीरोचरितं नामाभिनवं काव्यम् ॥

---

१. कुर्वते कर्मजातम्—कुर्वते + अकर्मजातम् ।
२. कृतिः, इत्यत्रैकत्वमुभयोरेकत्वद्योतनार्थम् ।

लेखक की अन्य कृतियाँ

१. संस्कृत–काव्य–संग्रह

२. काव्यसिद्धान्तकौमुदी

३. प्लवङ्गदूतम् (उत्तर प्रदेश सरकार द्वारा साहित्यिक पुरस्कार से सम्मानित)

४. स्वप्नवासवदत्तम् (व्याख्या)

५. रघुवंशम् (त्रयोदश सर्ग, व्याख्या)

६. कुमारसम्भवम् (तृतीय सर्ग, व्याख्या)

७. ,, (पञ्चम सर्ग, व्याख्या)

८. किरातार्जुनीयम् (द्वितीय सर्ग व्याख्या)

९. पञ्चतन्त्रम् (अपरीक्षितकारकम्, व्याख्या)

१०. कालिदासः (एकाङ्की नाटक)

११. रक्तदानम् (रेडियो नाटक)

१२. कालिदास-साहित्य एवं संदर्भ (Bibliography of Kalidasa's Leterature)

१३. कारकदीपिका

१४. रक्षाबंधनम् नाटक (मुद्रणस्थ)

१५. यीशुचरितम् (बाइबिल-न्यू टेस्टामेंट का संस्कृत-पद्यानुवाद) (प्रकाश्यमान)

१६. मम्मटाचार्य का काव्यप्रकाश और उसके टीकाकार (राँची विश्वविद्यालय द्वारा डी० लिट्० उपाधि से सम्मानित, (मुद्रणस्थ)

१७. संस्कृत शिक्षाया विकासे विहार प्रदेशस्य योगदानम् (मुद्रणस्थ)

१८. पाणिनिस्तस्य व्याख्यातारश्च (प्रकाश्यमान)

१९. धर्ममीमांसा

२०. हीरोचरितम्

२१. मातङ्गकन्या

**